शिवानंदलहरी

शिवानंदलहरी

कळाभ्यां चूडालंकृतशशिकळाभ्यां निजतपः-
-फलाभ्यां भक्तेषु प्रकटितफलाभ्यां भवतु मे |
शिवाभ्यामस्तोकत्रिभुवनशिवाभ्यां हृदि पुन-
-र्भवाभ्यामानंदस्फुरदनुभवाभ्यां नतिरियं || 1 ||

गळंती शंभो त्वच्चरितसरितः किल्बिषरजो
दळंती धीकुल्यासरणिषु पतंती विजयतां |
दिशंती संसारभ्रमणपरितापोपशमनं
वसंती मच्चेतोह्रदभुवि शिवानंदलहरी || 2 ||

त्रयीवेद्यं हृद्यं त्रिपुरहरमाद्यं त्रिनयनं
जटाभारोदारं चलदुरगहारं मृगधरं |
महादेवं देवं मयि सदयभावं पशुपतिं
चिदालंबं सांबं शिवमतिविडंबं हृदि भजे || 3 ||

सहस्रं वर्तंते जगति विबुधाः क्षुद्रफलदा
न मन्ये स्वप्ने वा तदनुसरणं तत्कृतफलं |
हरिब्रह्मादीनामपि निकटभाजामसुलभं
चिरं याचे शंभो शिव तव पदांभोजभजनं || 4 ||

स्मृतौ शास्त्रे वैद्ये शकुनकवितागानफणितौ
पुराणे मंत्रे वा स्तुतिनटनहास्येष्वचतुरः |
कथं राज्ञां प्रीतिर्भवति मयि कोऽहं पशुपते
पशुं मां सर्वज्ञ प्रथित कृपया पालय विभो || 5 ||

घटो वा मृत्पिंडोऽप्यणुरपि च धूमोऽग्निरचलः
पटो वा तंतुर्वा परिहरति किं घोरशमनं |
वृथा कंठक्षोभं वहसि तरसा तर्कवचसा
पदांभोजं शंभोर्भज परमसौख्यं व्रज सुधीः || 6 ||

मनस्ते पादाब्जे निवसतु वचः स्तोत्रफणितौ
करौ चाभ्यर्चायां श्रुतिरपि कथाकर्णनविधौ |
तव ध्याने बुद्धिर्नयनयुगळं मूर्तिविभवे
परग्रंथान्कैर्वा परमशिव जाने परमतः || 7 ||

यथा बुद्धिः शुक्तौ रजतमिति काचाश्मनि मणि-
-र्जले पैष्टे क्षीरं भवति मृगतृष्णासु सलिलं |
तथा देवभ्रांत्या भजति भवदन्यं जडजनो
महादेवेशं त्वां मनसि च न मत्वा पशुपते || 8 ||

गभीरे कासारे विशति विजने घोरविपिने
विशाले शैले च भ्रमति कुसुमार्थं जडमतिः |
समर्प्यैकं चेतः सरसिजमुमानाथ भवते
सुखेनावस्थातुं जन इह न जानाति किमहो || 9 ||

नरत्वं देवत्वं नगवनमृगत्वं मशकता
पशुत्वं कीटत्वं भवतु विहगत्वादि जननं |
सदा त्वत्पादाब्जस्मरणपरमानंदलहरी-
-विहारासक्तं चेद्धृदयमिह किं तेन वपुषा || 10 ||

वटुर्वा गेही वा यतिरपि जटी वा तदितरो
नरो वा यः कश्चिद्भवतु भव किं तेन भवति |
यदीयं हृत्पद्मं यदि भवदधीनं पशुपते
तदीयस्त्वं शंभो भवसि भवभारं च वहसि || 11 ||

गुहायां गेहे वा बहिरपि वने वाऽद्रिशिखरे
जले वा वह्नौ वा वसतु वसतेः किं वद फलं |
सदा यस्यैवांतःकरणमपि शंभो तव पदे
स्थितं चेद्योगोऽसौ स च परमयोगी स च सुखी || 12 ||

असारे संसारे निजभजनदूरे जडधिया
भ्रमंतं मामंधं परमकृपया पातुमुचितं |
मदन्यः को दीनस्तव कृपणरक्षातिनिपुण-
-स्त्वदन्यः को वा मे त्रिजगति शरण्यः पशुपते || 13 ||

प्रभुस्त्वं दीनानां खलु परमबंधुः पशुपते
प्रमुख्योऽहं तेषामपि किमुत बंधुत्वमनयोः |
त्वयैव क्षंतव्याः शिव मदपराधाश्च सकलाः
प्रयत्नात्कर्तव्यं मदवनमियं बंधुसरणिः || 14 ||

उपेक्षा नो चेत्किं न हरसि भवद्ध्यानविमुखां
दुराशाभूयिष्ठां विधिलिपिमशक्तो यदि भवान् |
शिरस्तद्वैधात्रं ननखलु सुवृत्तं पशुपते
कथं वा निर्यत्नं करनखमुखेनैव लुलितं || 15 ||

विरिंचिर्दीर्घायुर्भवतु भवता तत्परशिर-
-श्चतुष्कं संरक्ष्यं स खलु भुवि दैन्यं लिखितवान् |
विचारः को वा मां विशद कृपया पाति शिव ते
कटाक्षव्यापारः स्वयमपि च दीनावनपरः || 16 ||

फलाद्वा पुण्यानां मयि करुणया वा त्वयि विभो
प्रसन्नेऽपि स्वामिन् भवदमलपादाब्जयुगळं |
कथं पश्येयं मां स्थगयति नमः संभ्रमजुषां
निलिंपानां श्रेणिर्निजकनकमाणिक्यमकुटैः || 17 ||

त्वमेको लोकानां परमफलदो दिव्यपदवीं
वहंतस्त्वन्मूलां पुनरपि भजंते हरिमुखाः |
कियद्वा दाक्षिण्यं तव शिव मदाशा च कियती
कदा वा मद्रक्षां वहसि करुणापूरितदृशा || 18 ||

दुराशाभूयिष्ठे दुरधिपगृहद्वारघटके
दुरंते संसारे दुरितनिलये दुःखजनके |
मदायासं किं न व्यपनयसि कस्योपकृतये
वदेयं प्रीतिश्चेत्तव शिव कृतार्थाः खलु वयं || 19 ||

सदा मोहाटव्यां चरति युवतीनां कुचगिरौ
नटत्याशाशाखास्वटति झटिति स्वैरमभितः |
कपालिन् भिक्षो मे हृदयकपिमत्यंतचपलं
दृढं भक्त्या बद्ध्वा शिव भवदधीनं कुरु विभो || 20 ||

धृतिस्तंभाधारां दृढगुणनिबद्धां सगमनां
विचित्रां पद्माढ्यां प्रतिदिवससन्मार्गघटितां |
स्मरारे मच्चेतःस्फुटपटकुटीं प्राप्य विशदां
जय स्वामिन् शक्त्या सह शिव गणैः सेवित विभो || 21 ||

प्रलोभाद्यैरर्थाहरणपरतंत्रो धनिगृहे
प्रवेशोद्युक्तः सन् भ्रमति बहुधा तस्करपते |
इमं चेतश्चोरं कथमिह सहे शंकर विभो
तवाधीनं कृत्वा मयि निरपराधे कुरु कृपां || 22 ||

करोमि त्वत्पूजां सपदि सुखदो मे भव विभो
विधित्वं विष्णुत्वं दिशसि खलु तस्याः फलमिति |
पुनश्च त्वां द्रष्टुं दिवि भुवि वहन्पक्षिमृगता-
-मदृष्ट्वा तत्खेदं कथमिह सहे शंकर विभो || 23 ||

कदा वा कैलासे कनकमणिसौधे सह गणै-
-र्वसन् शंभोरग्रे स्फुटघटितमूर्धांजलिपुटः |
विभो सांब स्वामिन्परमशिव पाहीति निगद-
-न्विधातृणां कल्पान् क्षणमिव विनेष्यामि सुखतः || 24 ||

स्तवैर्ब्रह्मादीनां जयजयवचोभिर्नियमिनां
गणानां केळीभिर्मदकलमहोक्षस्य ककुदि |
स्थितं नीलग्रीवं त्रिनयनमुमाश्लिष्टवपुषं
कदा त्वां पश्येयं करधृतमृगं खंडपरशुं || 25 ||

कदा वा त्वां दृष्ट्वा गिरिश तव भव्यांघ्रियुगळं
गृहीत्वा हस्ताभ्यां शिरसि नयने वक्षसि वहन् |
समाश्लिष्याघ्राय स्फुटजलजगंधान्परिमला-
-नलाभ्यां ब्रह्माद्यैर्मुदमनुभविष्यामि हृदये || 26 ||

करस्थे हेमाद्रौ गिरिश निकटस्थे धनपतौ
गृहस्थे स्वर्भूजामरसुरभिचिंतामणिगणे |
शिरःस्थे शीतांशौ चरणयुगळस्थेऽखिलशुभे
कमर्थं दास्येऽहं भवतु भवदर्थं मम मनः || 27 ||

सारूप्यं तव पूजने शिव महादेवेति संकीर्तने
सामीप्यं शिवभक्तिधुर्यजनतासांगत्यसंभाषणे |
सालोक्यं च चराचरात्मकतनुध्याने भवानीपते
सायुज्यं मम सिद्धमत्र भवति स्वामिन् कृतार्थोऽस्म्यहं || 28 ||

त्वत्पादांबुजमर्चयामि परमं त्वां चिंतयाम्यन्वहं
त्वामीशं शरणं व्रजामि वचसा त्वामेव याचे विभो |
वीक्षां मे दिश चाक्षुषीं सकरुणां दिव्यैश्चिरं प्रार्थितां
शंभो लोकगुरो मदीयमनसः सौख्योपदेशं कुरु || 29 ||

वस्त्रोद्धूतविधौ सहस्रकरता पुष्पार्चने विष्णुता
गंधे गंधवहात्मताऽन्नपचने बर्हिर्मुखाध्यक्षता |
पात्रे कांचनगर्भतास्ति मयि चेद्बालेंदुचूडामणे
शुश्रूषां करवाणि ते पशुपते स्वामिंस्त्रिलोकीगुरो || 30 ||

नालं वा परमोपकारकमिदं त्वेकं पशूनां पते
पश्यन् कुक्षिगतांश्चराचरगणान् बाह्यस्थितान् रक्षितुं |
सर्वामर्त्यपलायनौषधमतिज्वालाकरं भीकरं
निक्षिप्तं गरळं गळे न गिळितं नोद्गीर्णमेव त्वया || 31 ||

ज्वालोग्रः सकलामरातिभयदः क्ष्वेळः कथं वा त्वया
दृष्टः किं च करे धृतः करतले किं पक्वजंबूफलं |
जिह्वायां निहितश्च सिद्धघुटिका वा कंठदेशे भृतः
किं ते नीलमणिर्विभूषणमयं शंभो महात्मन् वद || 32 ||

नालं वा सकृदेव देव भवतः सेवा नतिर्वा नुतिः
पूजा वा स्मरणं कथाश्रवणमप्यालोकनं मादृशां |
स्वामिन्नस्थिरदेवतानुसरणायासेन किं लभ्यते
का वा मुक्तिरितः कुतो भवति चेत्किं प्रार्थनीयं तदा || 33 ||

किं ब्रूमस्तव साहसं पशुपते कस्यास्ति शंभो भव-
-द्धैर्यं चेदृशमात्मनः स्थितिरियं चान्यैः कथं लभ्यते |
भ्रश्यद्देवगणं त्रसन्मुनिगणं नश्यत्प्रपंचं लयं
पश्यन्निर्भय एक एव विहरत्यानंदसांद्रो भवान् || 34 ||

योगक्षेमधुरंधरस्य सकलश्रेयःप्रदोद्योगिनो
दृष्टादृष्टमतोपदेशकृतिनो बाह्यांतरव्यापिनः |
सर्वज्ञस्य दयाकरस्य भवतः किं वेदितव्यं मया
शंभो त्वं परमांतरंग इति मे चित्ते स्मराम्यन्वहं || 35 ||

भक्तो भक्तिगुणावृते मुदमृतापूर्णे प्रसन्ने मनः
कुंभे सांब तवांघ्रिपल्लवयुगं संस्थाप्य संवित्फलं |
सत्वं मंत्रमुदीरयन्निजशरीरागारशुद्धिं वहन्
पुण्याहं प्रकटीकरोमि रुचिरं कळ्याणमापादयन् || 36 ||

आम्नायांबुधिमादरेण सुमनःसंघाः समुद्यन्मनो
मंथानं दृढभक्तिरज्जुसहितं कृत्वा मथित्वा ततः |
सोमं कल्पतरुं सुपर्वसुरभिं चिंतामणिं धीमतां
नित्यानंदसुधां निरंतररमासौभाग्यमातन्वते || 37 ||

प्राक्पुण्याचलमार्गदर्शितसुधामूर्तिः प्रसन्नः शिवः
सोमः सद्गणसेवितो मृगधरः पूर्णस्तमोमोचकः |
चेतः पुष्करलक्षितो भवति चेदानंदपाथोनिधिः
प्रागल्भ्येन विजृंभते सुमनसां वृत्तिस्तदा जायते || 38 ||

धर्मो मे चतुरंघ्रिकः सुचरितः पापं विनाशं गतं
कामक्रोधमदादयो विगळिताः कालाः सुखाविष्कृताः |
ज्ञानानंदमहौषधिः सुफलिता कैवल्यनाथे सदा
मान्ये मानसपुंडरीकनगरे राजावतंसे स्थिते || 39 ||

धीयंत्रेण वचोघटेन कविताकुल्योपकुल्याक्रमै-
-रानीतैश्च सदाशिवस्य चरितांभोराशिदिव्यामृतैः |
हृत्केदारयुताश्च भक्तिकलमाः साफल्यमातन्वते
दुर्भिक्षान्मम सेवकस्य भगवन्विश्वेश भीतिः कुतः || 40 ||

पापोत्पातविमोचनाय रुचिरैश्वर्याय मृत्युंजय
स्तोत्रध्याननतिप्रदक्षिणसपर्यालोकनाकर्णने |
जिह्वाचित्तशिरोंघ्रिहस्तनयनश्रोत्रैरहं प्रार्थितो
मामाज्ञापय तन्निरूपय मुहुर्मामेव मा मेऽवचः || 41 ||

गांभीर्यं परिखापदं घनधृतिः प्राकार उद्यद्गुण-
-स्तोमश्चाप्तबलं घनेंद्रियचयो द्वाराणि देहे स्थितः |
विद्या वस्तुसमृद्धिरित्यखिलसामग्रीसमेते सदा
दुर्गातिप्रियदेव मामकमनोदुर्गे निवासं कुरु || 42 ||

मा गच्छ त्वमितस्ततो गिरिश भो मय्येव वासं कुरु
स्वामिन्नादिकिरात मामकमनःकांतारसीमांतरे |
वर्तंते बहुशो मृगा मदजुषो मात्सर्यमोहादय-
-स्तान्हत्वा मृगयाविनोदरुचितालाभं च संप्राप्स्यसि || 43 ||

करलग्नमृगः करींद्रभंगो
घनशार्दूलविखंडनोऽस्तजंतुः |
गिरिशो विशदाकृतिश्च चेतः-
-कुहरे पंचमुखोऽस्ति मे कुतो भीः || 44 ||

छंदःशाखिशिखान्वितैर्द्विजवरैः संसेविते शाश्वते
सौख्यापादिनि खेदभेदिनि सुधासारैः फलैर्दीपिते |
चेतःपक्षिशिखामणे त्यज वृथासंचारमन्यैरलं
नित्यं शंकरपादपद्मयुगळीनीडे विहारं कुरु || 45 ||

आकीर्णे नखराजिकांतिविभवैरुद्यत्सुधावैभवै-
-राधौतेऽपि च पद्मरागललिते हंसव्रजैराश्रिते |
नित्यं भक्तिवधूगणैश्च रहसि स्वेच्छाविहारं कुरु
स्थित्वा मानसराजहंस गिरिजानाथांघ्रिसौधांतरे || 46 ||

शंभुध्यानवसंतसंगिनि हृदारामेऽघजीर्णच्छदाः
स्रस्ता भक्तिलताच्छटा विलसिताः पुण्यप्रवाळश्रिताः |
दीप्यंते गुणकोरका जपवचःपुष्पाणि सद्वासना
ज्ञानानंदसुधामरंदलहरी संवित्फलाभ्युन्नतिः || 47 ||

नित्यानंदरसालयं सुरमुनिस्वांतांबुजाताश्रयं
स्वच्छं सद्द्विजसेवितं कलुषहृत्सद्वासनाविष्कृतं |
शंभुध्यानसरोवरं व्रज मनोहंसावतंस स्थिरं
किं क्षुद्राश्रयपल्वलभ्रमणसंजातश्रमं प्राप्स्यसि || 48 ||

आनंदामृतपूरिता हरपदांभोजालवालोद्यता
स्थैर्योपघ्नमुपेत्य भक्तिलतिका शाखोपशाखान्विता |
उच्छैर्मानसकायमानपटलीमाक्रम्य निष्कल्मषा
नित्याभीष्टफलप्रदा भवतु मे सत्कर्मसंवर्धिता || 49 ||

संध्यारंभविजृंभितं श्रुतिशिरःस्थानांतराधिष्ठितं
सप्रेमभ्रमराभिराममसकृत्सद्वासनाशोभितं |
भोगींद्राभरणं समस्तसुमनःपूज्यं गुणाविष्कृतं
सेवे श्रीगिरिमल्लिकार्जुनमहालिंगं शिवालिंगितं || 50 ||

भृंगीच्छानटनोत्कटः करमदग्राही स्फुरन्माधवा-
-ह्लादो नादयुतो महासितवपुः पंचेषुणा चादृतः |
सत्पक्षः सुमनोवनेषु स पुनः साक्षान्मदीये मनो-
-राजीवे भ्रमराधिपो विहरतां श्रीशैलवासी विभुः || 51 ||

कारुण्यामृतवर्षिणं घनविपद्ग्रीष्मच्छिदाकर्मठं
विद्यासस्यफलोदयाय सुमनःसंसेव्यमिच्छाकृतिं |
नृत्यद्भक्तमयूरमद्रिनिलयं चंचज्जटामंडलं
शंभो वांछति नीलकंधर सदा त्वां मे मनश्चातकः || 52 ||

आकाशेन शिखी समस्तफणिनां नेत्रा कलापी नता-
-नुग्राहिप्रणवोपदेशनिनदैः केकीति यो गीयते |
श्यामां शैलसमुद्भवां घनरुचिं दृष्ट्वा नटंतं मुदा
वेदांतोपवने विहाररसिकं तं नीलकंठं भजे || 53 ||

संध्या घर्मदिनात्ययो हरिकराघातप्रभूतानक-
-ध्वानो वारिदगर्जितं दिविषदां दृष्टिच्छटा चंचला |
भक्तानां परितोषबाष्पवितितिर्वृष्टिर्मयूरी शिवा
यस्मिन्नुज्ज्वलतांडवं विजयते तं नीलकंठं भजे || 54 ||

आद्यायामिततेजसे श्रुतिपदैर्वेद्याय साध्याय ते
विद्यानंदमयात्मने त्रिजगतः संरक्षणोद्योगिने |
ध्येयायाखिलयोगिभिः सुरगणैर्गेयाय मायाविने
सम्यक्तांडवसंभ्रमाय जटिने सेयं नतिः शंभवे || 55 ||

नित्याय त्रिगुणात्मने पुरजिते कात्यायनीश्रेयसे
सत्यायादिकुटुंबिने मुनिमनः प्रत्यक्षचिन्मूर्तये |
मायासृष्टजगत्त्रयाय सकलाम्नायांतसंचारिणे
सायंतांडवसंभ्रमाय जटिने सेयं नतिः शंभवे || 56 ||

नित्यं स्वोदरपोषणाय सकलानुद्दिश्य वित्ताशया
व्यर्थं पर्यटनं करोमि भवतः सेवां न जाने विभो |
मज्जन्मांतरपुण्यपाकबलतस्त्वं शर्व सर्वांतर-
-स्तिष्ठस्येव हि तेन वा पशुपते ते रक्षणीयोऽस्म्यहं || 57 ||

एको वारिजबांधवः क्षितिनभोव्याप्तं तमोमंडलं
भित्त्वा लोचनगोचरोऽपि भवति त्वं कोटिसूर्यप्रभः |
वेद्यः किं न भवस्यहो घनतरं कीदृग्भवेन्मत्तम-
-स्तत्सर्वं व्यपनीय मे पशुपते साक्षात्प्रसन्नो भव || 58 ||

हंसः पद्मवनं समिच्छति यथा नीलांबुदं चातकः
कोकः कोकनदप्रियं प्रतिदिनं चंद्रं चकोरस्तथा |
चेतो वांछति मामकं पशुपते चिन्मार्गमृग्यं विभो
गौरीनाथ भवत्पदाब्जयुगळं कैवल्यसौख्यप्रदं || 59 ||

रोधस्तोयहृतः श्रमेण पथिकश्छायां तरोर्वृष्टितो
भीतः स्वस्थगृहं गृहस्थमतिथिर्दीनः प्रभुं धार्मिकं |
दीपं संतमसाकुलश्च शिखिनं शीतावृतस्त्वं तथा
चेतः सर्वभयापहं व्रज सुखं शंभोः पदांभोरुहं || 60 ||

अंकोलं निजबीजसंततिरयस्कांतोपलं सूचिका
साध्वी नैजविभुं लता क्षितिरुहं सिंधुः सरिद्वल्लभं |
प्राप्नोतीह यथा तथा पशुपतेः पादारविंदद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते || 61 ||

आनंदाश्रुभिरातनोति पुलकं नैर्मल्यतश्छादनं
वाचाशंखमुखे स्थितैश्च जठरापूर्तिं चरित्रामृतैः |
रुद्राक्षैर्भसितेन देव वपुषो रक्षां भवद्भावना-
-पर्यंके विनिवेश्य भक्तिजननी भक्तार्भकं रक्षति || 62 ||

मार्गावर्तितपादुका पशुपतेरंगस्य कूर्चायते
गंडूषांबुनिषेचनं पुररिपोर्दिव्याभिषेकायते |
किंचिद्भक्षितमांसशेषकबळं नव्योपहारायते
भक्तिः किं न करोत्यहो वनचरो भक्तावतंसायते || 63 ||

वक्षस्ताडनमंतकस्य कठिनापस्मारसंमर्दनं
भूभृत्पर्यटनं नमत्सुरशिरःकोटीरसंघर्षणं |
कर्मेदं मृदुलस्य तावकपदद्वंद्वस्य किं वोचितं
मच्चेतोमणिपादुकाविहरणं शंभो सदांगीकुरु || 64 ||

वक्षस्ताडनशंकया विचलितो वैवस्वतो निर्जराः
कोटीरोज्ज्वलरत्नदीपकलिकानीराजनं कुर्वते |
दृष्ट्वा मुक्तिवधूस्तनोति निभृताश्लेषं भवानीपते
यच्चेतस्तव पादपद्मभजनं तस्येह किं दुर्लभं || 65 ||

क्रीडार्थं सृजसि प्रपंचमखिलं क्रीडामृगास्ते जनाः
यत्कर्माचरितं मया च भवतः प्रीत्यै भवत्येव तत् |
शंभो स्वस्य कुतूहलस्य करणं मच्चेष्टितं निश्चितं
तस्मान्मामकरक्षणं पशुपते कर्तव्यमेव त्वया || 66 ||

बहुविधपरितोषबाष्पपूर-
-स्फुटपुलकांकितचारुभोगभूमिं |
चिरपदफलकांक्षिसेव्यमानां
परमसदाशिवभावनां प्रपद्ये || 67 ||

अमितमुदमृतं मुहुर्दुहंतीं
विमलभवत्पदगोष्ठमावसंतीं |
सदय पशुपते सुपुण्यपाकां
मम परिपालय भक्तिधेनुमेकां || 68 ||

जडता पशुता कळंकिता
कुटिलचरत्वं च नास्ति मयि देव |
अस्ति यदि राजमौळे
भवदाभरणस्य नास्मि किं पात्रं || 69 ||

अरहसि रहसि स्वतंत्रबुद्ध्या
वरिवसितुं सुलभः प्रसन्नमूर्तिः |
अगणितफलदायकः प्रभुर्मे
जगदधिको हृदि राजशेखरोऽस्ति || 70 ||

आरूढभक्तिगुणकुंचितभावचाप-
-युक्तैः शिवस्मरणबाणगणैरमोघैः |
निर्जित्य किल्बिषरिपून्विजयी सुधींद्रः
सानंदमावहति सुस्थिरराजलक्ष्मीं || 71 ||

ध्यानांजनेन समवेक्ष्य तमःप्रदेशं
भित्त्वा महाबलिभिरीश्वरनाममंत्रैः |
दिव्याश्रितं भुजगभूषणमुद्वहंति
ये पादपद्ममिह ते शिव ते कृतार्थाः || 72 ||

भूदारतामुदवहद्यदपेक्षया श्री-
-भूदार एव किमतः सुमते लभस्व |
केदारमाकलितमुक्तिमहौषधीनां
पादारविंदभजनं परमेश्वरस्य || 73 ||

आशापाशक्लेशदुर्वासनादि-
-भेदोद्युक्तैर्दिव्यगंधैरमंदैः |
आशाशाटीकस्य पादारविंदं
चेतःपेटीं वासितां मे तनोतु || 74 ||

कळ्याणिनं सरसचित्रगतिं सवेगं
सर्वेंगितज्ञमनघं ध्रुवलक्षणाढ्यं |
चेतस्तुरंगमधिरुह्य चर स्मरारे
नेतः समस्तजगतां वृषभाधिरूढ || 75 ||

भक्तिर्महेशपदपुष्करमावसंती
कादंबिनीव कुरुते परितोषवर्षं |
संपूरितो भवति यस्य मनस्तटाक-
-स्तज्जन्मसस्यमखिलं सफलं च नान्यत् || 76 ||

बुद्धिः स्थिरा भवितुमीश्वरपादपद्म-
-सक्ता वधूर्विरहिणीव सदा स्मरंती |
सद्भावनास्मरणदर्शनकीर्तनादि
सम्मोहितेव शिवमंत्रजपेन विंते || 77 ||

सदुपचारविधिष्वनुबोधितां
सविनयां सुहृदं समुपाश्रितां |
मम समुद्धर बुद्धिमिमां प्रभो
वरगुणेन नवोढवधूमिव || 78 ||

नित्यं योगिमनः सरोजदळसंचारक्षमस्त्वत्क्रमः
शंभो तेन कथं कठोरयमराड्वक्षःकवाटक्षतिः |
अत्यंतं मृदुलं त्वदंघ्रियुगळं हा मे मनश्चिंतय-
-त्येतल्लोचनगोचरं कुरु विभो हस्तेन संवाहये || 79 ||

एष्यत्येष जनिं मनोऽस्य कठिनं तस्मिन्नटानीति म-
-द्रक्षायै गिरिसीम्नि कोमलपदन्यासः पुराभ्यासितः |
नो चेद्दिव्यगृहांतरेषु सुमनस्तल्पेषु वेद्यादिषु
प्रायः सत्सु शिलातलेषु नटनं शंभो किमर्थं तव || 80 ||

कंचित्कालमुमामहेश भवतः पादारविंदार्चनैः
कंचिद्ध्यानसमाधिभिश्च नतिभिः कंचित्कथाकर्णनैः |
कंचित्कंचिदवेक्षणैश्च नुतिभिः कंचिद्दृशामीदृशीं
यः प्राप्नोति मुदा त्वदर्पितमना जीवन् स मुक्तः खलु || 81 ||

बाणत्वं वृषभत्वमर्धवपुषा भार्यात्वमार्यापते
घोणित्वं सखिता मृदंगवहता चेत्यादि रूपं दधौ |
त्वत्पादे नयनार्पणं च कृतवांस्त्वद्देहभागो हरिः
पूज्यात्पूज्यतरः स एव हि न चेत्को वा तदन्योऽधिकः || 82 ||

जननमृतियुतानां सेवया देवतानां
न भवति सुखलेशः संशयो नास्ति तत्र |
अजनिममृतरूपं सांबमीशं भजंते
य इह परमसौख्यं ते हि धन्या लभंते || 83 ||

शिव तव परिचर्यासन्निधानाय गौर्या
भव मम गुणधुर्यां बुद्धिकन्यां प्रदास्ये |
सकलभुवनबंधो सच्चिदानंदसिंधो
सदय हृदयगेहे सर्वदा संवस त्वं || 84 ||

जलधिमथनदक्षो नैव पाताळभेदी
न च वनमृगयायां नैव लुब्धः प्रवीणः |
अशनकुसुमभूषावस्त्रमुख्यां सपर्यां
कथय कथमहं ते कल्पयानींदुमौळे || 85 ||

पूजाद्रव्यसमृद्धयो विरचिताः पूजां कथं कुर्महे
पक्षित्वं न च वा किटित्वमपि न प्राप्तं मया दुर्लभं |
जाने मस्तकमंघ्रिपल्लवमुमाजाने न तेऽहं विभो
न ज्ञातं हि पितामहेन हरिणा तत्त्वेन तद्रूपिणा || 86 ||

अशनं गरळं फणी कलापो
वसनं चर्म च वाहनं महोक्षः |
मम दास्यसि किं किमस्ति शंभो
तव पादांबुजभक्तिमेव देहि || 87 ||

यदा कृतांभोनिधिसेतुबंधनः
करस्थलाधःकृतपर्वताधिपः |
भवानि ते लंघितपद्मसंभव-
-स्तदा शिवार्चास्तवभावनक्षमः || 88 ||

नतिभिर्नुतिभिस्त्वमीश पूजा-
-विधिभिर्ध्यानसमाधिभिर्न तुष्टः |
धनुषा मुसलेन चाश्मभिर्वा
वद ते प्रीतिकरं तथा करोमि || 89 ||

वचसा चरितं वदामि शंभो-
-रहमुद्योगविधासु तेऽप्रसक्तः |
मनसाकृतिमीश्वरस्य सेवे
शिरसा चैव सदाशिवं नमामि || 90 ||

आद्याविद्या हृद्गता निर्गतासी-
-द्विद्या हृद्या हृद्गता त्वत्प्रसादात् |
सेवे नित्यं श्रीकरं त्वत्पदाब्जं
भावे मुक्तेर्भाजनं राजमौळे || 91 ||

दूरीकृतानि दुरितानि दुरक्षराणि
दौर्भाग्यदुःखदुरहंकृतिदुर्वचांसि |
सारं त्वदीयचरितं नितरां पिबंतं
गौरीश मामिह समुद्धर सत्कटाक्षैः || 92 ||

सोमकळाधरमौळौ
कोमलघनकंधरे महामहसि |
स्वामिनि गिरिजानाथे
मामकहृदयं निरंतरं रमतां || 93 ||

सा रसना ते नयने
तावेव करौ स एव कृतकृत्यः |
या ये यौ यो भर्गं
वदतीक्षेते सदार्चतः स्मरति || 94 ||

अतिमृदुलौ मम चरणा-
-वतिकठिनं ते मनो भवानीश |
इति विचिकित्सां संत्यज
शिव कथमासीद्गिरौ तथा वेशः || 95 ||

धैर्यांकुशेन निभृतं
रभसादाकृष्य भक्तिशृंखलया |
पुरहर चरणालाने
हृदयमदेभं बधान चिद्यंत्रैः || 96 ||

प्रचरत्यभितः प्रगल्भवृत्त्या
मदवानेष मनः करी गरीयान् |
परिगृह्य नयेन भक्तिरज्वा
परम स्थाणु पदं दृढं नयामुं || 97 ||

सर्वालंकारयुक्तां सरळपदयुतां साधुवृत्तां सुवर्णां
सद्भिः संस्तूयमानां सरसगुणयुतां लक्षितां लक्षणाढ्यां |
उद्यद्भूषाविशेषामुपगतविनयां द्योतमानार्थरेखां
कल्याणीं देव गौरीप्रिय मम कविताकन्यकां त्वं गृहाण || 98 ||

इदं ते युक्तं वा परमशिव कारुण्यजलधे
गतौ तिर्यग्रूपं तव पदशिरोदर्शनधिया |
हरिब्रह्माणौ तौ दिवि भुवि चरंतौ श्रमयुतौ
कथं शंभो स्वामिन्कथय मम वेद्योऽसि पुरतः || 99 ||

स्तोत्रेणालमहं प्रवच्मि न मृषा देवा विरिंचादयः
स्तुत्यानां गणनाप्रसंगसमये त्वामग्रगण्यं विदुः |
माहात्म्याग्रविचारणप्रकरणे धानातुषस्तोमव-
-द्धूतास्त्वां विदुरुत्तमोत्तमफलं शंभो भवत्सेवकाः || 100 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ शिवानंदलहरी ||